श्रीमते रामानुजाय नमः

# ॥ श्री गोदोपमाष्टकम् ॥

सन्मानसाब्ज प्रवणां सारासारविवेकिनीम् ।
सद्गतिं शुद्धरूपां त्वां गोदे! हंसीं प्रचक्षते ॥ 1

तेजोमयस्वरूपत्वात् श्रीमत्सेवित वैभवात् ।
चिन्तामणिसमा गोदे! देशिकैः त्वमिहोच्यसे ॥ 2

अनेकशाखोज्ज्वलित स्वरूपात् अनन्तभोगिप्रिय वर्धकत्वात् ।
सुरेशभूषासुमनः प्रदानात् सुरद्रुमेणासि समाद्य गोदे ॥ 3

सद्गोविलासेन तमोहरत्वात् समस्तसद्वन्दित मण्डलत्वात् ।
पद्माननौज्ज्वल्यकर प्रभावात् भासीह गोदे रवितुल्य शीला ॥ 4

कलानिधित्वात् कमलात्मकत्वात्
भवार्ति ताप क्षपणस्वशैत्यात् ।
सदा महाविष्णुपदानुषङ्गात्
हिमांशुतुल्य त्वमिहासि गोदे ॥ 5

श्यामां द्विजाधिपसुतां श्रवणाभिरामां
मञ्जुस्वनां मदनमीश्वरजं भजन्तीम् ।
गोदे गुरोस्त्रिजगतां गुणशालिनीं त्वां
लीलाशुकीं कृतधियः समुदाहरन्ति ॥ 6

वृषप्रियां विश्वजनाखिलार्थ
विश्राणनोत्कां विधिवासवेद्याम् ।
श्रुतिप्रसन्नां सुरभिं विशंके
स्वस्थां मखार्हां भवतीं तु गोदे ॥ 7

गोदे स्नातासि मातस्त्वमिह निगमशास्त्रोक्त मन्त्रक्रियाभ्याम्
एतेनैवातिपापा वयमपि सकला मुक्तपापा भवामः ।
लोके दृष्टञ्च कर्मेदृशमिह सकलैः स्वप्रजारोग शान्त्यै
माता पीत्वा कषायं तनयमथ निजस्तन्य दानेन पाति ॥ 8

॥ इति गोदोपमाष्टकम् ॥